# Shri RudrasahasranAmastotram from Bhringiritisamhita

# શ્રીરુદ્રસહસ્રનામસ્તોત્રં ભૃઙ્ગિરિટિસંહિતાયામ્

## Document Information

Text title : rudrasahasranAmastotrabhringiriTi

File name : rudrasahasranAmastotrabhringiriTi.itx

Category : sahasranAma, shiva

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, DPD

Description/comments : Shivanamamanjari Part 1

Latest update : January 13, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીરુદ્રસહસ્રનામસ્તોત્રં ભૃઙ્ગિરિટિસંહિતાયામ્

॥ પૂર્વપીઠિકા ॥

કૈલાસાચલશૃઙ્ગાગ્રે રત્નસિંહાસને સ્થિતમ્ ।
પાર્વત્યા સહિતં દેવં શિવં વેદાન્તવર્ણિતમ્ ॥ ૧॥

કદાચિદ્ભગવાન્વિષ્ણુઃ આગત્ય પરયા મુદા ।
તુષ્ટાવ વિવિધૈસ્સ્તોત્રૈઃ ભગવન્તમુમાપતિમ્ ॥ ૨॥

મહાદેવ! મહાદેવ! મહાદેવ! દયાનિધે! ।
ભવાનેવ ભવાનેવ ભવાનેવ ગતિર્મમ ॥ ૩॥

સ્રષ્ટારોઽપિ પ્રજાનાં પ્રબલભવભયાદ્યં નમસ્યન્તિ દેવાઃ
યશ્ચિત્તે સમ્પ્રવિષ્ટોઽપ્યવહિતમનસાં ધ્યાનયુક્તાત્મનાં ચ ।
લોકાનામાદિદેવઃ સ જયતુ ભગવન્શ્રીભવાનીસમેતઃ
બિભ્રાણઃ સોમલેખામહિવલયવરં ગાઙ્ગચન્દ્રૌ કપાલમ્ ॥ ૪॥

નમશ્શિવાય સામ્બાય સગણાય સસૂનવે ।
સનન્દિને સગઙ્ગાય સવૃષાય નમો નમઃ ॥ ૫॥

સ્વર્ણાસનાય સૌમ્યાય શક્તિશૂલધરાય ચ ।
નમો દિક્ચર્મવસ્ત્રાય ઈશાનાય નમો નમઃ ॥ ૬॥

બ્રહ્મણે બ્રહ્મદેહાય નમસ્તત્પુરુષાય તે ।
નમોઽન્ધકવિનાશાય અઘોરાય નમો નમઃ ॥ ૭॥

રુદ્રાય પઞ્ચવક્ત્રાય વામદેવાય તે નમઃ ।
સર્વરોગવિનાશાય સદ્યોજાતાય તે નમઃ ॥ ૮॥

ગિરિશાય સુદેહાય સુન્દરાય નમો નમઃ ।
ભીમાયોગ્રસ્વરૂપાય વિજયાય નમો નમઃ ॥ ૯॥

સુરાસુરાધિપતયે અનન્તાય નમો નમઃ ।

સૂક્ષ્માય વહ્નિહસ્તાય વરખટ્વાઙ્ગધારિણે ॥ ૧૦॥

શિવોત્તમાય ભર્ગાય વિરૂપાક્ષાય તે નમઃ ।
શાન્તાય ચ તમોઘ્નાય એકનેત્રાય તે નમઃ ॥ ૧૧॥

બેધસે વિશ્વરૂપાય એકરુદ્રાય તે નમઃ ।
ભક્તાનુકમ્પિનેઽત્યર્થં નમસ્તેઽસ્તુ ત્રિમૂર્તયે ॥

શ્રીકણ્ઠાય નમસ્તેઽસ્તુ રુદ્રાણાં શતધારિણે ॥ ૧૨॥

પઞ્ચાસ્યાય શુભાસ્યાય નમસ્તેઽસ્તુ શિખણ્ડિને ।
એવં સ્તુતો મહાદેવઃ પ્રાહ ગમ્ભીરયા ગિરા ॥ ૧૩॥

કિં તવેષ્ટં મમ પુરો વદ વિષ્ણો ! પ્રિયંકર ! ।
ઇત્યુક્તઃ કમલાક્ષસ્તુ શિવં પ્રાહ રમાપતિઃ ॥ ૧૪॥

લોકાનાં રક્ષણે તાવત્ નિયુક્તો ભવતા હ્યહમ્ ।
તદ્રક્ષણે યથાશક્તો ભવેયં ચ તથા કુરુ ॥ ૧૫॥

અસુરાણાં વધાર્થાય બલં દેહિ વપુષ્ષુ મે ।
રુદ્રનામસહસ્રં ચ તદર્થં વદ મે પ્રભો ॥ ૧૬॥

ઇતિ સમ્પ્રાર્થિતસ્તેન માધવેન મહેશ્વરઃ ।
પ્રોવાચ રુદ્રનામાનિ તન્માહાત્મ્યસ્ય સઙ્ગ્રહમ્ ॥ ૧૭॥

અજૈકપાદહિર્બુધ્ન્યઃ ત્વષ્ટા પ્રોક્તસ્તૃતીયગઃ ।
વિશ્વરૂપહરશ્ચૈવ બહુરૂપસ્ત્રિયમ્બકઃ ॥ ૧૮॥

અપરાજિતસ્સપ્તમશ્ચ અષ્ટમશ્ચ વૃષાકપિઃ ।
શમ્ભુઃ કપર્દી દશમઃ રૈવત એકાદશઃ સ્મૃતઃ ॥ ૧૯॥

ઇત્યેકાદશરુદ્રાણાં નામાનિ કથિતાનિ તે ।
જામાતારમનાહૂય શિવં શાન્તિં પિનાકિનમ્ ॥ ૨૦॥

યજ્ઞમારબ્ધવાન્દક્ષઃ મામેકં ચ સતીપતિમ્ ।
ઇતિ વિજ્ઞાય સઙ્ક્રુદ્ધઃ ભગવાન્સોમશેખરઃ ॥ ૨૧॥

પ્રલયાગ્નિપ્રભો રુદ્રઃ સહસ્રશિરસાન્વિતઃ ।
દ્વિસહસ્રકરો દીર્ઘઃ સકલાયુધપાણિમાન્ ॥ ૨૨॥

અટ્ટહાસકરો ભીમઃ દ્વિસહસ્રાક્ષિસંયુતઃ ।

મહોગ્રનર્તનાભિજ્ઞઃ સર્વસંહારતાણ્ડવઃ ॥ ૨૩॥

દક્ષાધ્વરં નાશિતવાન્ તતો દેવાઃ પલાયિતાઃ ।
અતઃ શ્રીરુદ્રદેવસ્ય પૂજનાત્સર્વદેવતાઃ ॥ ૨૪॥

પ્રીતાશ્ચ વરદાને યાઃ સુમુખ્યશ્ચ ભવન્તિ તાઃ ।
તસ્માત્ત્વમપિ દેવેશં રુદ્રં સમ્પૂજયાધુના ॥ ૨૫॥

તાત્પૂજનોપકારાય તન્નામાનિ વદામિ તે ।
શ‍ૃણુ ત્વં શ્રદ્ધયોપેતઃ તન્નામાનિ વરાણિ ચ ॥ ૨૬॥

ઇત્યુક્ત્વા ભગવાન્દેવો વિષ્ણવે પ્રભવિષ્ણવે ।
રુદ્રસ્યારમ્ભમન્ત્રોઽયં પ્રણવઃ પરિકીર્તિતઃ ॥ ૨૭॥

તતો નમશ્ચેતિ પરં ભગવતે ચ તતઃ પરમ્ ।
રુદ્રાયેતિ તતઃ પશ્ચાત્ મન્ત્રક્રમ ઉદીરિતઃ ॥ ૨૮॥

પ્રત્યક્ષરં નામશતં સહસં ક્રમશો ભવેત્ ।
રુદ્રનામાં સહસ્રં ચ ઉપદિશ્યાન્તર્દધે પ્રભુઃ ॥ ૨૯॥

॥ ન્યાસઃ ॥

અસ્ય શ્રીરુદ્રસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય ।
ભગવાન્ મહાદેવ ઋષિઃ । દેવીગાયત્રીછન્દઃ ।
સર્વસંહારકર્તા શ્રીરુદ્રો દેવતા । શ્રીંબીજમ્ । રું શક્તિઃ ।
દ્રં કીલકમ્ । શ્રીરુદ્ર પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

ૐ અઙ્ગુષ્ઠાભ્યાં નમઃ । નં તર્જનીભ્યાં નમઃ ।
મં મધ્યમાભ્યાં નમઃ । ભં અનામિકાભ્યાં નમઃ ।
ગં કનિષ્ઠિકાભ્યાં નમઃ । વં કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

તેં હૃદયાય નમઃ । રું શિરસે સ્વાહા । દ્રાં શિખાયૈ વષટ્ ।
યં કવચાય હુમ્ । ૐ નેત્રત્રયાય વૌષટ્ । શ્રીં અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ।

॥ ધ્યાનમ્ ॥

નેત્રાણાં દ્વિસહસ્રકૈઃ પરિવૃતમત્યુગ્રચર્મામ્બરં
હેમાભં ગિરિશં સહસ્રશિરસં આમુક્તકેશાન્વિતમ્ ।
ઘણ્ટામણ્ડિતપાદપદ્મયુગલં નાગેન્દ્રકુમ્ભોપરિ

તિષ્ઠન્તં દ્વિસહસ્રહસ્તમનિશં ધ્યાયામિ રુદ્રં પરમ્ ॥

॥ પઞ્ચપૂજા ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્સમર્પયામિ ।

સહસ્રનામસ્તોત્ર પારાયણસમાપ્તૌ અઙ્ગન્યાસમાત્રં કૃત્વા
ધ્યાત્વા દિગ્વિમોકં, લમિત્યાદિ પઞ્ચપૂજાં ચ કુર્યાત્ ॥

॥ અથ શ્રીરુદ્રસહસ્રનામસ્તોત્રમ્ ॥

। ૐ નમો ભગવતે રુદ્રાય ।

ૐ ઐં હ્રીં જપસ્તુત્યઃ ૐ નમઃ પદવાચકઃ ।
ૐકારકર્તા ચોંકારવેત્તા ચોંકારબોધકઃ ॥ ૧॥

ૐકારકન્દરાસિંહઃ ૐકારજ્ઞાનવારિધિઃ ।
ૐકારકન્દાકુરિકઃ ૐકારવદનોજ્જ્વલઃ ॥ ૨॥

ૐકારકાકુદશ્ચાયં ૐકારપદવાચકઃ ।
ૐકારકુણ્ડસમાર્ચિઃ ૐકારાવાલકલ્પકઃ ॥ ૩॥

ૐકારકોકમિહિરઃ ૐકારશ્રીનિકેતનઃ ।
ૐકારકણ્ઠશ્ચોંકારસ્કન્ધશ્ચોંકારદોર્યુગઃ ॥ ૪॥

ૐકારચરણદ્વન્દ્વઃ ૐકારમણિપાદુકઃ ।
ૐકારચક્ષુશ્ચોઙ્કારશ્રુતિશ્ચોઙ્કારભ્રૂર્યુગઃ ॥ ૫॥

ૐકારજપસુપ્રીતઃ ૐકારૈકપરાયણઃ ।
ૐકારદીર્ઘિકાહંસશ્ચોઙ્કારજપતારકઃ ॥ ૬॥

ૐકારપદતત્ત્વાર્થઃ ૐકારામ્ભોધિચન્દ્રમાઃ ।
ૐકારપીઠમધ્યસ્થઃ ૐકારાર્થપ્રકાશકઃ ॥ ૭॥

ૐકારપૂજ્યશ્ચોઙ્કારસ્થિતશ્ચોઙ્કારસુપ્રભુઃ ।
ૐકારપૃષ્ઠશ્ચોઙ્કારકટિશ્ચોઙ્કારમધ્યમઃ ॥ ૮॥

ૐકારપેટકમણિઃ ૐકારાભરણોજ્જ્વલઃ ।
ૐકારપઞ્જરશુકઃ ૐકારાર્ણવમૌક્તિકઃ ॥ ૯॥

ૐકારભદ્રપીઠસ્થઃ ૐકારસ્તુતવિગ્રહઃ ।
ૐકારભાનુકિરણઃ ૐકારકમલાકરઃ ॥ ૧૦॥

ૐકારમણિદીપાર્ચિઃ ૐકારવૃષવાહનઃ ।
ૐકારમયસર્વાઙ્ગ ૐકારગિરિજાપતિઃ ॥ ૧૧॥

ૐકારમાકન્દવિકઃ ૐકારાદર્શબિમ્બિતઃ ।
ૐકારમૂર્તિશ્ચોંકારનિધિશ્ચોંકારસન્નિભઃ ॥ ૧૨॥

ૐકારમૂર્ધા ચોંકારભાલશ્ચોંકારનાસિકઃ ।
ૐકારમણ્ડપાવાસઃ ૐકારાઙ્ગણદીપકઃ ॥ ૧૩॥

ૐકારમૌલિશ્ચોંકારકેલિશ્ચોંકારવારિધિઃ ।
ૐકારારણ્યહરિણઃ ૐકારશશિશેખરઃ ॥ ૧૪॥

ૐકારારામમન્દારઃ ૐકારબ્રહ્મવિત્તમઃ ।
ૐકારરૂપશ્ચોંકારવાચ્ય ૐકારચિન્તકઃ ॥ ૧૫॥

ૐકારોદ્યાનબર્હીચ ૐકારશરદમ્બુદઃ ।
ૐકારવક્ષાશ્ચોંકાર કુક્ષિશ્ચોંકારપાર્શ્વકઃ ॥ ૧૬॥

ૐકારવેદોપનિષત્ ૐકારાધ્વરદીક્ષિતઃ ।
ૐકારશેખરશ્ચૈવ તથા ચોંકારવિશ્વકઃ ॥ ૧૭॥

ૐકારસક્થિશ્ચોંકારજાનુશ્ચોંકારગુલ્ફકઃ ।
ૐકારસારસર્વસ્વઃ ૐકારસુમષટ્પદઃ ॥ ૧૮॥

ૐકારસૌધનિલયઃ ૐકારાસ્થાનનર્તકઃ ।
ૐકારહનુરેવાયં ૐકારવટુ રીરિતઃ ॥ ૧૯॥

ૐકારજ્ઞેય એવાયં તથા ચોંકારપેશલઃ ।
ૐ નં બીજજપપ્રીતઃ ૐ યોં ભંમંસ્વરૂપકઃ ॥ ૨૦॥

ૐપદાતીતવસ્ત્વંશઃ ઓમિત્યેકાક્ષરાત્પરઃ ।
ૐપદેન ચ સંસ્તવ્યઃ ૐકારધ્યેય એવ ચ ॥ ૨૧॥

ૐ યં બીજજપારાધ્યઃ ૐકારનગરાધિપઃ ।

ૐ વં તેં બીજસુલભઃ ૐ રું દ્રાં બીજતત્પરઃ ॥ ૨૨॥

ૐ શિવાયેતિ સઞ્જપ્યઃ ૐ હ્રીં શ્રીં બીજસાધકઃ ।
નકારરૂપો નાદાન્તો નારાયણસમાશ્રિતઃ ॥ ૨૩॥

નગપ્રવરમધ્યસ્થો નમસ્કારપ્રિયો નટઃ ।
નગેન્દ્રભૂષણો નાગવાહનો નન્દિવાહનઃ ॥ ૨૪॥

નન્દિકેશસમારાધ્યો નન્દનો નન્દિવર્ધનઃ ।
નરકક્લેશશમનો નિમેષો નિરુપદ્રવઃ ॥ ૨૫॥

નરસિંહાર્ચિતપદઃ નવનાગનિષેવિતઃ ।
નવગ્રહાર્ચિતપદો નવસૂત્રવિધાનવિત્ ॥ ૨૬॥

નવચન્દનલિપ્તાઙ્ગો નવચન્દ્રકલાધરઃ ।
નવનીત પ્રિયાહારો નિપુણો નિપુણપ્રિયઃ ॥ ૨૭॥

નવબ્રહ્માર્ચિતપદો નગેન્દ્રતનયાપ્રિયઃ ।
નવભસ્મવિદિગ્ધાઙ્ગો નવબન્ધવિમોચકઃ ॥ ૨૮॥

નવવસ્ત્રપરીધાનો નવરત્નવિભૂષિતઃ ।
નવસિદ્ધસમારાધ્યો નામરૂપવિવર્જિતઃ ॥ ૨૯॥

નાકેશપૂજ્યો નાદાત્મા નિર્લેપો નિધનાધિપઃ ।
નાદપ્રિયો નદીભર્તા નરનારાયણાર્ચિતઃ ॥ ૩૦॥

નાદબિન્દુકલાતીતઃ નાદબિન્દુકલાત્મકઃ ।
નાદાકારો નિરાધારો નિષ્પ્રભો નીતિવિત્તમઃ ॥ ૩૧॥

નાનાક્રતુવિધાનજ્ઞો નાનાભીષ્ટવરપ્રદઃ ।
નામપારાયણપ્રીતો નાનાશાસ્ત્રવિશારદઃ ॥ ૩૨॥

નારદાદિ સમારાધ્યો નવદુર્ગાર્ચનપ્રિયઃ ।
નિખિલાગમ સંસેવ્યો નિગમાચારતત્પરઃ ॥ ૩૩॥

નિચેરુર્નિષ્ક્રિયો નાથો નિરીહો નિધિરૂપકઃ ।
નિત્યક્રુદ્ધો નિરાનન્દો નિરાભાસો નિરામયઃ ॥ ૩૪॥

નિત્યાનપાયમહિમા નિત્યબુદ્ધો નિરંકુશઃ ।
નિત્યોત્સાહો નિત્યનિત્યો નિત્યાનન્દ સ્વરૂપકઃ ॥ ૩૫॥

નિરવદ્યો નિશુમ્ભઘ્નો નદીરૂપો નિરીશ્વરઃ ।
નિર્મલો નિર્ગુણો નિત્યો નિરપાયો નિધિપ્રદઃ ॥ ૩૬॥

નિર્વિકલ્પો નિર્ગુણસ્થો નિષઙ્ગી નીલલોહિતઃ ।
નિષ્કલંકો નિષ્પ્રપઞ્ચો નિર્દ્વન્દ્વો નિર્મલપ્રભઃ ॥ ૩૭॥

નિસ્તુલો નીલચિકુરો નિસ્સઙ્ગો નિત્યમઙ્ગલઃ ।
નીપપ્રિયો નિત્યપૂર્ણો નિત્યમઙ્ગલવિગ્રહઃ ॥ ૩૮॥

નીલગ્રીવો નિરુપમો નિત્યશુદ્ધો નિરઞ્જનઃ ।
નૈમિત્તિકાર્ચનપ્રીતો નવર્ષિગણસેવિતઃ ॥ ૩૯॥

નૈમિશારણ્યનિલયો નીલજીમૂતનિસ્વનઃ ।
મકારરૂપો મન્ત્રાત્મા માયાતીતો મહાનિધિઃ ॥ ૪૦॥

મકુટાઙ્ગદકેયૂરકંકણાદિપરિષ્કૃતઃ ।
મણિમણ્ડપમધ્યસ્થો મૃડાનીપરિસેવિતઃ ॥ ૪૧॥

મધુરો મધુરાનાથો મીનાક્ષીપ્રાણવલ્લભઃ ।
મનોન્મનો મહેષ્વાસો માન્ધાનૃપતિ પૂજિતઃ ॥ ૪૨॥

મયસ્કરો મૃડો મૃગ્યો મૃગહસ્તો મૃગપ્રિયઃ ।
મલયસ્થો મન્દરસ્થો મલયાનિલસેવિતઃ ॥ ૪૩॥

મહાકાયો મહાવક્ત્રો મહાદંષ્ટ્રો મહાહનુઃ ।
મહાકૈલાસનિલયો મહાકારુણ્યવારિધિઃ ॥ ૪૪॥

મહાગુણો મહોત્સાહો મહામઙ્ગલવિગ્રહઃ ।
મહાજાનુર્મહાજઙ્ઘો મહાપાદો મહાનખઃ ॥ ૪૫॥

મહાધારો મહાધીરો મઙ્ગલો મઙ્ગલપ્રદઃ ।
મહાધૃતિર્મહામેઘઃ મહામન્ત્રો મહાશનઃ ॥ ૪૬॥

મહાપાપપ્રશમનો મિતભાષી મધુપ્રદઃ ।
મહાબુદ્ધિર્મહાસિદ્ધિર્મહાયોગી મહેશ્વરઃ ॥ ૪૭॥

મહાભિષેકસન્તુષ્ટો મહાકાલો મહાનટઃ ।
મહાભુજો મહાવક્ષાઃ મહાકુક્ષિર્મહાકટિઃ ॥ ૪૮॥

મહાભૂતિપ્રદો માન્યો મુનિવૃન્દ નિષેવિતઃ ।
મહાવીરેન્દ્રવરદો મહાલાવણ્યશેવધિઃ ॥ ૪૯॥

માતૃમણ્ડલસંસેવ્યઃ મન્ત્રતન્ત્રાત્મકો મહાન્ ।
માધ્યન્દિનસવસ્તુત્યો મખધ્વંસી મહેશ્વરઃ ॥ ૫૦॥

માયાબીજજપપ્રીતઃ માષાન્નપ્રીતમાનસઃ ।
માર્તાણ્ડભૈરવારાધ્યો મોક્ષદો મોહિનીપ્રિયઃ ॥ ૫૧॥

માર્તાણ્ડમણ્ડલસ્થશ્ચ મન્દારકુસુમપ્રિયઃ ।
મિથિલાપુર સંસ્થાનો મિથિલાપતિપૂજિતઃ ॥ ૫૨॥

મિથ્યાજગદધિષ્ઠાનો મિહિરો મેરુકાર્મુકઃ ।
મુદ્ગૌદનપ્રિયો મિત્રો મયોભૂર્મન્ત્રવિત્તમઃ ॥ ૫૩॥

મૂલાધારસ્થિતો મુગ્ધો મણિપૂરનિવાસકઃ ।
મૃગાક્ષો મહિષારૂઢો મહિષાસુરમર્દનઃ ॥ ૫૪॥

મૃગાઙ્કશેખરો મૃત્યુઞ્જયો મૃત્યુવિનાશકઃ ।
મેરુશ◌ૃઙ્ગાગ્રનિલયો મહાશાન્તો મહીસ્તુતઃ ॥ ૫૫॥

મૌઞ્જીબદ્ધશ્ચ મઘવાન્મહેશો મઙ્ગલપ્રદઃ ।
મઞ્જુમઞ્જીરચરણો મન્ત્રિપૂજ્યો મદાપહઃ ॥ ૫૬॥

મંબીજ જપસન્તુષ્ટઃ માયાવી મારમર્દનઃ ।
ભક્તકલ્પતરુર્ભાગ્યદાતા ભાવાર્થગોચરઃ ॥ ૫૭॥

ભક્તચૈતન્યનિલયો ભાગ્યારોગ્યપ્રદાયકઃ ।
ભક્તપ્રિયો ભક્તિગમ્યો ભક્તવશ્યો ભયાપહઃ ॥ ૫૮॥

ભક્તેષ્ટદાતા ભક્તાર્તિભઞ્જનો ભક્તપોષકઃ ।
ભદ્રદો ભઙ્ગુરો ભીષ્મો ભદ્રકાલીપ્રિયઙ્કરઃ ॥ ૫૯॥

ભદ્રપીઠકૃતાવાસો ભુવન્તિર્ભદ્રવાહનઃ ।
ભવભીતિહરો ભર્ગો ભાર્ગવો ભારતીપ્રિયઃ ॥ ૬૦॥

ભવ્યો ભવો ભવાનીશો ભૂતાત્મા ભૂતભાવનઃ ।
ભસ્માસુરેષ્ટદો ભૂમા ભર્તા ભૂસુરવન્દિતઃ ॥ ૬૧॥

ભાગીરથીપ્રિયો ભૌમો ભગીરથસમર્ચિતઃ ।
ભાનુકોટિપ્રતીકાશઃ ભગનેત્રવિદારણઃ ॥ ૬૨॥

ભાલનેત્રાગ્નિસન્દગ્ધમન્મથો ભૂભૃદાશ્રયઃ ।

ભાષાપતિસ્તુતો ભાસ્વાન્ ભવહેતિર્ભયંકરઃ ॥ ૬૩॥

ભાસ્કરો ભાસ્કરારાધ્યો ભક્તચિત્તાપહારકઃ ।
ભીમકર્મા ભીમવર્મા ભૂતિભૂષણભૂષિતઃ ॥ ૬૪॥

ભીમઘણ્ટાકરો ભણ્ડાસુરવિધ્વંસનોત્સુકઃ ।
ભુમ્ભારવપ્રિયો ભ્રૂણહત્યાપાતકનાશનઃ ॥ ૬૫॥

ભૂતકૃદ્ ભૂતભૃદ્ભાવો ભીષણો ભીતિનાશનઃ ।
ભૂતવ્રાતપરિત્રાતા ભીતાભીતભયાપહઃ ॥ ૬૬॥

ભૂતાધ્યક્ષો ભરદ્વાજો ભારદ્વાજસમાશ્રિતઃ ।
ભૂપતિત્વપ્રદો ભીમો ભૈરવો ભીમનિસ્વનઃ ॥ ૬૭॥

ભૂભારોત્તરણો ભૃઙ્ગિરિરિટિસેવ્યપદામ્બુજઃ ।
ભૂમિદો ભૂતિદો ભૂતિર્ભવારણ્યકુઠારકઃ ॥ ૬૮॥

ભૂર્ભુવસ્સ્વઃ પતિઃ ભૂપો ભિણ્ડિવાલભુસુણ્ડિભૃત્ ।
ભૂલોકવાસી ભૂલોકનિવાસિજનસેવિતઃ ॥ ૬૯॥

ભૂસુરારાધનપ્રીતો ભૂસુરેષ્ટફલપ્રદઃ ।
ભૂસુરેડ્યો ભૂસૂરેશો ભૂતભેતાલ સેવિતઃ ॥ ૭૦॥

ભૈરવાષ્ટકસંસેવ્યો ભૈરવો ભૂમિજાર્ચિતઃ ।
ભોગદો ભોગભુગ્ભોગ્યો ભોગિભૂષણભૂષિતઃ ॥ ૭૧॥

ભોગમાર્ગપ્રદો ભોગી ભોગિકુણ્ડલમણ્ડિતઃ ।
ભોગમોક્ષપ્રદો ભોક્તા ભિક્ષાચરણતત્પરઃ ॥ ૭૨॥

ગકારરૂપો ગણપો ગુણાતીતો ગુહપ્રિયઃ ।
ગજચર્મપરીધાનો ગમ્ભીરો ગાધિપૂજિતઃ ॥ ૭૩॥

ગજાનનપ્રિયો ગૌરીવલ્લભો ગિરિશો ગુણઃ ।
ગણો ગૃત્સો ગૃત્સપતિર્ગરુડાગ્રજપૂજિતઃ ॥ ૭૪॥

ગદાદ્યાયુધસમ્પન્નો ગન્ધમાલ્યવિભૂષિતઃ ।
ગયાપ્રયાગનિલયો ગુડાકેશપ્રપૂજિતઃ ॥ ૭૫॥

ગર્વાતીતો ગણ્ડપતિર્ગણકો ગણગોચરઃ ।
ગાયત્રીમન્ત્રજનકો ગીયમાનગુણો ગુરુઃ ॥ ૭૬॥

ગુણજ્ઞેયો ગુણધ્યેયો ગોપ્તા ગોદાવરીપ્રિયઃ ।
ગુણાકરો ગુણાતીતો ગુરુમણ્ડલસેવિતઃ ॥ ૭૭॥

ગુણાધારો ગુણાધ્યક્ષો ગર્વિતો ગાનલોલુપઃ ।
ગુણત્રયાત્મા ગુહ્યશ્ચ ગુણત્રયવિભાવિતઃ ॥ ૭૮॥

ગુરુધ્યાતપદદ્વન્દ્વો ગિરીશો ગુણગોચરઃ ।
ગુહાવાસો ગુહાધ્યક્ષો ગુડાન્નપ્રીતમાનસઃ ॥ ૭૯॥

ગૂઢગુલ્ફો ગૂઢતનુર્ગજારૂઢો ગુણોજ્જ્વલઃ ।
ગૂઢપાદપ્રિયો ગૂઢો ગૌડપાદનિષેવિતઃ ॥ ૮૦॥

ગોત્રાણતત્પરો ગ્રીષ્મો ગીષ્પતિર્ગોપતિસ્તથા ।
ગોરોચનપ્રિયો ગુપ્તો ગોમાતૃપરિસેવિતઃ ॥ ૮૧

ગોવિન્દવલ્લભો ગઙ્ગાજૂટો ગોવિન્દપૂજિતઃ ।
ગોષ્ટયો ગૃહ્યો ગુહાન્તસ્થો ગહ્વરેષ્ઠો ગદાન્તકૃત્ ॥ ૮

ગોસવાસક્તહૃદયો ગોપ્રિયો ગોધનપ્રદઃ ।
ગોહત્યાદિપ્રશમનો ગોત્રી ગૌરીમનોહરઃ ॥ ૮૩॥

ગઙ્ગાસ્નાનપ્રિયો ગર્ગો ગઙ્ગાસ્નાનફલપ્રદઃ ।
ગન્ધપ્રિયો ગીતપાદો ગ્રામણીર્ગહનો ગિરિઃ ॥ ૮૪

ગન્ધર્વગાનસુપ્રીતો ગન્ધર્વાપ્સરસાં પ્રિયઃ ।
ગન્ધર્વસેવ્યો ગન્ધર્વો ગન્ધર્વકુલભૂષણઃ ॥ ૮૫॥

ગંબીજજપસુપ્રીતો ગાયત્રીજપતત્પરઃ ।
ગમ્ભીરવાક્યો ગગનસમરૂપો ગિરિપ્રિયઃ ॥ ૮૬॥

ગમ્ભીરહૃદયો ગેયો ગમ્ભીરો ગર્વનાશનઃ ।
ગાઙ્ગેયાભરણપ્રીતો ગુણજ્ઞો ગુણવાન્ગુહઃ ॥ ૮૭॥

વકારરૂપો વરદો વાગીશો વસુદો વસુઃ ।
વજ્રી વજ્રપ્રિયો વિષ્ણુઃ વીતરાગો વિરોચનઃ ॥ ૮૮॥

વન્દ્યો વરેણ્યો વિશ્વાત્મા વરુણો વામનો વપુઃ ।
વશ્યો વશંકરો વાત્યો વાસ્તવ્યો વાસ્તુપો વિધિઃ ॥ ૮૯॥

વાચામગોચરો વાગ્મી વાચસ્પત્યપ્રદાયકઃ ।
વામદેવો વરારોહો વિઘ્નેશો વિઘ્નનાશકઃ ॥ ૯૦॥

વારિરૂપો વાયુરૂપો વૈરિવીર્ય વિદારણઃ ।
વિક્લબો વિહ્વલો વ્યાસો વ્યાસસૂત્રાર્થગોચરઃ ॥ ૯૧॥

વિપ્રપ્રિયો વિપ્રરૂપો વિપ્રક્ષિપ્રપ્રસાદકઃ ।
વિપ્રારાધનસન્તુષ્ટો વિપ્રેષ્ટફલદાયકઃ ॥ ૯૨॥

વિભાકરસ્તુતો વીરો વિનાયકનમસ્કૃતઃ ।
વિભુર્વિભ્રાજિતતનુર્વિરૂપાક્ષો વિનાયકઃ ॥ ૯૩॥

વિરાગિજનસંસ્તુત્યો વિરાગી વિગતસ્પૃહઃ ।
વિરિઞ્ચપૂજ્યો વિક્રાન્તો વદનત્રયસંયુતઃ ॥ ૯૪॥

વિશૃંખલો વિવિક્તસ્થો વિદ્વાન્વક્ત્રચતુષ્ટયઃ ।
વિશ્વપ્રિયો વિશ્વકર્તા વષટ્કારપ્રિયો વરઃ ॥ ૯૫॥

વિશ્વમૂર્તિર્વિશ્વકીર્તિર્વિશ્વવ્યાપી વિયત્પ્રભુઃ ।
વિશ્વસ્રષ્ટા વિશ્વગોપ્તા વિશ્વભોક્તા વિશેષવિત્ ॥ ૯૬॥

વિષ્ણુપ્રિયો વિયદ્રૂપો વિરાડ્રૂપો વિભાવસુઃ ।
વીરગોષ્ઠીપ્રિયો વૈદ્યો વદનૈકસમન્વિતઃ ॥ ૯૭॥

વીરભદ્રો વીરકર્તા વીર્યવાન્વારણાર્તિહૃત્ ।
વૃષાંકો વૃષભારૂઢો વૃક્ષેશો વિન્ધ્યમર્દનઃ ॥ ૯૮॥

વેદાન્તવેદ્યો વેદાત્મા વદનદ્વયશોભિતઃ ।
વજ્રદંષ્ટ્રો વજ્રનખો વન્દારુજનવત્સલઃ ॥ ૯૯॥

વન્દ્યમાનપદદ્વન્દ્વો વાક્યજ્ઞો વક્ત્રપઞ્ચકઃ ।
વંબીજજપસન્તુષ્ટો વાક્પ્રિયો વામલોચનઃ ॥ ૧૦૦॥

વ્યોમકેશો વિધાનજ્ઞો વિષભક્ષણતત્પરઃ ।
તકારરૂપસ્તદ્રૂપસ્તત્પદાર્થસ્વરૂપકઃ ॥ ૧૦૧॥

તટિલ્લતાસમરુચિસ્તત્ત્વજ્ઞાનપ્રબોધકઃ ।
તત્ત્વમસ્યાદિવાક્યાર્થ સ્તપોદાનફલપ્રદઃ ॥ ૧૦૨॥

તત્ત્વજ્ઞસ્તત્ત્વનિલયસ્તત્ત્વવાચ્યસ્તપોનિધિઃ ।
તત્ત્વાસનસ્તત્સવિતુર્જપસન્તુષ્ટમાનસઃ ॥ ૧૦૩॥

તન્ત્રયન્ત્રાત્મકસ્તન્ત્રી તન્ત્રજ્ઞસ્તાણ્ડવપ્રિયઃ ।

તન્ત્રીલયવિધાનજ્ઞસ્તન્ત્રમાર્ગપ્રદર્શકઃ ॥ ૧૦૪॥

તપસ્યાધ્યાનનિરતસ્તપસ્વી તાપસપ્રિયઃ ।
તપોલોકજનસ્તુત્યસ્તપસ્વિજનસેવિતઃ ॥ ૧૦૫॥

તરુણસ્તારણસ્તારસ્તારાધિપનિભાનનઃ ।
તરુણાદિત્યસંકાશસ્તપ્તકાઞ્ચનભૂષણઃ ॥ ૧૦૬॥

તલાદિભુવનાન્તસ્થસ્તત્ત્વમર્થસ્વરૂપકઃ ।
તામ્રવક્ત્રસ્તામ્રચક્ષુસ્તામ્રજિહ્વસ્તનૂદરઃ ॥ ૧૦૭॥

તારકાસુરવિધ્વંસી તારકસ્તારલોચનઃ ।
તારાનાથકલામૌલિસ્તારાનાથસમુદ્યુતિઃ ॥ ૧૦૮॥

તાર્ક્ષ્યકસ્તાર્ક્ષ્યવિનુતસ્ત્વષ્ટા ત્રૈલોક્યસુન્દરઃ ।
તામ્બૂલપૂરિતમુખસ્તક્ષા તામ્રાધરસ્તનુઃ ॥ ૧૦૯॥

તિલાક્ષતપ્રિયસ્ત્રિસ્થસ્તત્ત્વસાક્ષી તમોગુણઃ ।
તુરઙ્ગવાહનારૂઢસ્તુલાદાનફલપ્રદઃ ॥ ૧૧૦॥

તુલસીબિલ્વનિર્ગુણ્ડીજમ્બીરામલકપ્રિયઃ ।
તુલામાઘસ્નાનતુષ્ટસ્તુષ્ટાતુષ્ટપ્રસાદનઃ ॥ ૧૧૧॥

તુહિનાચલસંકાશસ્તમાલકુસુમાકૃતિઃ ।
તુઙ્ગભદ્રાતીરવાસી તુષ્ટભક્તેષ્ટદાયકઃ ॥ ૧૧૨॥

તોમરાદ્યાયુધધરસ્તુષારાદ્રિસુતાપ્રિયઃ ।
તોષિતાખિલદૈત્યૌઘસ્ત્રિકાલજ્ઞમુનિપ્રિયઃ ॥ ૧૧૩॥

ત્રયીમયસ્ત્રયીવેદ્યસ્ત્રયીવન્દ્યસ્ત્રયીતનુઃ ।
ત્રય્યન્તનિલયસ્તત્ત્વનિધિસ્તામ્રસ્તમોપહઃ ॥ ૧૧૪॥

ત્રિકાલપૂજનપ્રીતસ્તિલાન્નપ્રીતમાનસઃ ।
ત્રિધામા તીક્ષ્ણપરશુઃ તીક્ષ્ણેષુસ્તેજસાં નિધિઃ ॥ ૧૧૫॥

ત્રિલોકરક્ષકસ્ત્રેતાયજનપ્રીતમાનસઃ ।
ત્રિલોકવાસી ત્રિગુણો દ્વિનેત્રસ્ત્રિદશાધિપઃ ॥ ૧૧૬॥

ત્રિવર્ગદસ્ત્રિકાલજ્ઞસ્તૃપ્તિદસ્તુમ્બુરુસ્તુતઃ ।
ત્રિવિક્રમસ્ત્રિલોકાત્મા ત્રિમૂર્તિસ્ત્રિપુરાન્તકઃ ॥ ૧૧૭॥

ત્રિશૂલભીષણસ્તીવ્રસ્તીર્થ્યસ્તીક્ષ્ણવરપ્રદઃ ।
રઘુસ્તુતપદદ્વન્દ્વો રવ્યાદિગ્રહસંસ્તુતઃ ॥ ૧૧૮ ॥

રજતાચલશ‍ૃઙ્ગાગ્રનિલયો રજતપ્રભઃ ।
રતપ્રિયો રહઃપૂજ્યો રમણીયગુણાકરઃ ॥ ૧૧૯ ॥

રથકારો રથપતિઃ રથો રત્નાકરપ્રિયઃ ।
રથોત્સવપ્રિયો રસ્યો રજોગુણવિનાશકૃત્ ॥ ૧૨૦ ॥

રત્નડોલોત્સવપ્રીતો રણત્કિંકિણિમેખલઃ ।
રત્નદો રાજકો રાગી રઙ્ગવિદ્યાવિશારદઃ ॥ ૧૨૧ ॥

રત્નપૂજનસન્તુષ્ટો રત્નસાનુશરાસનઃ ।
રત્નમણ્ડપમધ્યસ્થો રત્નગ્રૈવેયકુણ્ડલઃ ॥ ૧૨૨ ॥

રત્નાકરસ્તુતો રત્નપીઠસ્થો રણપણ્ડિતઃ ।
રત્નાભિષેકસન્તુષ્ટો રત્નકાઞ્ચનભૂષણઃ ॥ ૧૨૩ ॥

રત્નાઙ્ગુલીયવલયો રાજત્કરસરોરુહઃ ।
રમાપતિસ્તુતો રમ્યો રાજમણ્ડલમધ્યગઃ ॥ ૧૨૪ ॥

રમાવાણીસમારાધ્યો રાજ્યદો રત્નભૂષણઃ ।
રમ્ભાદિસુન્દરીસેવ્યો રક્ષોહા રાકિણીપ્રિયઃ ॥ ૧૨૫ ॥

રવિચન્દ્રાગ્નિનયનો રત્નમાલ્યામ્બરપ્રિયઃ ।
રવિમણ્ડલમધ્યસ્થો રવિકોટિસમપ્રભઃ ॥ ૧૨૬ ॥

રાકેન્દુવદનો રાત્રિઞ્ચરપ્રાણાપહારકઃ ।
રાજરાજપ્રિયો રૌદ્રો રુરુહસ્તો રુરુપ્રિયઃ ॥ ૧૨૭ ॥

રાજરાજેશ્વરો રાજપૂજિતો રાજ્યવર્ધનઃ ।
રામાર્ચિતપદદ્વન્દ્વો રાવણાર્ચિતવિગ્રહઃ ॥ ૧૨૮ ॥

રાજવશ્યકરો રાજા રાશીકૃતજગત્ત્રયઃ ।
રાજીવચરણો રાજશેખરો રવિલોચનઃ ॥ ૧૨૯ ॥

રાજીવપુષ્પસંકાશો રાજીવાક્ષો રણોત્સુકઃ ।
રાત્રિઞ્ચરજનાધ્યક્ષો રાત્રિઞ્ચરનિષેવિતઃ ॥ ૧૩૦ ॥

રાધામાધવસંસેવ્યો રાધામાધવવલ્લભઃ ।
રુક્માઙ્ગદસ્તુતો રુદ્રો રજસ્સત્ત્વતમોમયઃ ॥ ૧૩૧ ॥

રુદ્રમન્ત્રજપપ્રીતો રુદ્રમણ્ડલસેવિતઃ ।
રુદ્રાક્ષજપસુપીતો રુદ્રલોકપ્રદાયકઃ ॥ ૧૩૨॥

રુદ્રાક્ષમાલાભરણો રુદ્રાણીપ્રાણનાયકઃ ।
રુદ્રાણીપૂજનપ્રીતો રુદ્રાક્ષમકુટોજ્વલઃ ॥ ૧૩૩॥

રુરુચર્મપરીધાનો રુક્માઙ્ગદપરિષ્કૃતઃ ।
રેફસ્વરૂપો રુદ્રાત્મા રુદ્રાધ્યાયજપપ્રિયઃ ॥ ૧૩૪॥

રેણુકાવરદો રામો રૂપહીનો રવિસ્તુતઃ ।
રેવાનદીતીરવાસી રોહિણીપતિવલ્લભઃ ॥ ૧૩૫॥

રોગેશો રોગશમનો રૈદો રક્તબલિપ્રિયઃ ।
રંબીજજપસન્તુષ્ટો રાજીવકુસુમપ્રિયઃ ॥ ૧૩૬॥

રમ્ભાફલપ્રિયો રૌદ્રદૃક્ રક્ષાકર રૂપવાન્ ।
દકારરૂપો દેવેશો દરસ્મેરમુખામ્બુજઃ ॥ ૧૩૭॥

દરાન્દોલિતદીર્ઘાક્ષો દ્રોણપુષ્પાર્ચનપ્રિયઃ ।
દક્ષારાધ્યો દક્ષકન્યાપતિર્દક્ષવરપ્રદઃ ॥ ૧૩૮॥

દક્ષિણાદક્ષિણારાધ્યો દક્ષિણામૂર્તિરૂપભૃત્ ।
દાડિમીબીજરદનો દાડિમીકુસુમપ્રિયઃ ॥ ૧૩૯

દાન્તો દક્ષમખધ્વંસી દણ્ડો દમયિતા દમઃ ।
દારિદ્યધ્વંસકો દાતા દયાલુર્દાનવાન્તકઃ ॥ ૧૪૦

દારુકારણ્યનિલયો દશદિક્પાલપૂજિતઃ ।
દાક્ષાયણીસમારાધ્યો દનુજારિર્દયાનિધિઃ ॥ ૧૪૧

દિવ્યાયુધધરો દિવ્યમાલ્યામ્બરવિભૂષણઃ ।
દિગમ્બરો દાનરૂપો દુર્વાસમુનિપૂજિતઃ ॥ ૧૪૨॥

દિવ્યાન્તરિક્ષગમનો દુરાધર્ષો દયાત્મકઃ ।
દુગ્ધાભિષેચનપ્રીતો દુઃખદોષવિવર્જિતઃ ॥ ૧૪૩॥

દુરાચારપ્રશમનો દુગ્ધાન્નપ્રીતમાનસઃ ।
દુર્લભો દુર્ગમો દુર્ગો દુઃખહન્તા દુરાર્તિહા ॥ ૧૪૪॥

દુર્વાસા દુષ્ટભયદો દુર્જયો દુરતિક્તમઃ ।

દુષ્ટહન્તા દેવસૈન્યપતિર્દમ્ભવિવર્જિતઃ ॥ ૧૪૫॥

દુઃસ્વપ્નનાશનો દુષ્ટદુરો દુર્વારવિત્તમઃ ।
દૂર્વાયુગ્મસમારાધ્યો દુત્તૂરકુસુમપ્રિયઃ ॥ ૧૪૬॥

દેવગઙ્ગાજટાજૂટો દેવતાપ્રાણવલ્લભઃ ।
દેવતાર્તિપ્રશમનો દીનદૈન્યવિમોચનઃ ॥ ૧૪૭॥

દેવદેવો દૈત્યગુરુઃ દણ્ડનાથપ્રપૂજિતઃ ।
દેવભોગ્યો દેવયોગ્યો દીપ્તમૂર્તિર્દિવસ્પતિઃ ॥ ૧૪૮॥

દેવર્ષિવર્યો દેવર્ષિવન્દિતો દેવભોગદઃ ।
દેવાદિદેવો દેવેજ્યો દૈત્યદર્પનિષૂદનઃ ॥ ૧૪૯॥

દેવાસુરગણાધ્યક્ષો દેવાસુરગણાગ્રણીઃ ।
દેવાસુર તપસ્તુષ્ટો દેવાસુરવરપ્રદઃ ॥ ૧૫૦॥

દેવાસુરેશ્વરારાધ્યો દેવાન્તકવરપ્રદઃ ।
દેવાસુરેશ્વરો દેવો દેવાસુરમહેશ્વરઃ ॥ ૧૫૧॥

દેવેન્દ્રરક્ષકો દીર્ઘો દેવવૃન્દનિષેવિતઃ ।
દેશકાલપરિજ્ઞાતા દેશોપદ્રવનાશકઃ ॥ ૧૫૨॥

દોષાકરકલામૌલિર્દુર્વારભુજવિક્રમઃ ।
દણ્ડકારણ્યનિલયો દણ્ડી દણ્ડપ્રસાદકઃ ॥ ૧૫૩॥

દણ્ડનીતિર્દુરાવાસો દ્યોતો દુર્મતિનાશનઃ ।
દ્વન્દ્વાતીતો દીર્ઘદર્શી દાનાધ્યક્ષો દયાપરઃ ॥ ૧૫૪॥

યકારરૂપો યન્ત્રાત્મા યન્ત્રારાધનતત્પરઃ ।
યજમાનાદ્યષ્ટમૂર્તિર્યામિનીચરદર્પહા ॥ ૧૫૫॥

યજુર્વેદપ્રિયો યુદ્ધમર્મજ્ઞો યુદ્ધકૌશલઃ ।
યત્નસાધ્યો યષ્ટિધરો યજમાનપ્રિયો યજુઃ ॥ ૧૫૬॥

યથાર્થરૂપો યુગકૃદ્યુગરૂપો યુગાન્તકૃત્ ।
યથોક્તફલદો યોષાપૂજનપ્રીતમાનસઃ ॥ ૧૫૭॥

યદૃચ્છાલાભસન્તુષ્ટો યાચકાર્તિનિષૂદનઃ ।
યન્ત્રાસનો યન્ત્રમયો યન્ત્રમન્ત્રસ્વરૂપકઃ ॥ ૧૫૮॥

યમરૂપો યામરૂપો યમબાધાનિવર્તકઃ ।
યમાદિયોગનિરતો યોગમાર્ગપ્રદર્શકઃ ॥ ૧૫૯॥

યવાક્ષતાર્ચનરતો યાવચિહ્નિતપાદુકઃ ।
યક્ષરાજસખો યજ્ઞો યક્ષેશો યક્ષપૂજિતઃ ॥ ૧૬૦॥

યક્ષરાક્ષસસંસેવ્યો યાતુધાનવરપ્રદઃ ।
યજ્ઞગુહ્યો યજ્ઞકર્તા યજમાનસ્વરૂપકઃ ॥ ૧૬૧॥

યજ્ઞાન્તકૃદ્યજ્ઞપૂજ્યો યજ્ઞભુગ્યજ્ઞવાહનઃ ।
યાગપ્રિયો યાનસેવ્યો યુવા યૌવનગર્વિતઃ ॥ ૧૬૨॥

યાતાયાતાદિરહિતો યતિધર્મપરાયણઃ ।
યાત્રાપ્રિયો યમીયામ્યદણ્ડપાશનિકૃન્તનઃ ॥ ૧૬૩॥

યાત્રાફલપ્રદો યુક્તો યશસ્વી યમુનાપ્રિયઃ ।
યાદઃપતિર્યજ્ઞપતિર્યતિર્યજ્ઞપરાયણઃ ॥ ૧૬૪॥

યાદવાનાં પ્રિયો યોદ્ધા યોધારાન્ધન તત્પરઃ ।
યામપૂજનસન્તુષ્ટો યોષિત્સઙ્ગવિવર્જિતઃ ॥ ૧૬૫॥

યામિનીપતિસંસેવ્યો યોગિનીગણસેવિતઃ ।
યાયજૂકો યુગાવર્તો યાચ્આરૂપો યથેષ્ટદઃ ॥ ૧૬૬॥

યાવૌદનપ્રીતચિત્તો યોનિષ્ઠો યામિનીપ્રિયઃ ।
યાજ્ઞવલ્ક્યપ્રિયો યજ્વા યજ્ઞેશો યજ્ઞસાધનઃ ॥ ૧૬૭॥

યોગમાયામયો યોગમાયાસંવૃતવિગ્રહઃ ।
યોગસિદ્ધો યોગિસેવ્યો યોગાનન્દસ્વરૂપકઃ ॥ ૧૬૮॥

યોગક્ષેમકરો યોગક્ષેમદાતા યશસ્કરઃ ।
યોગી યોગાસનારાધ્યો યોગાઙ્ગો યોગસઙ્ગ્રહઃ ॥ ૧૬૯॥

યોગીશ્વરેશ્વરો યોગ્યો યોગદાતા યુગન્ધરઃ ।
યોષિત્પ્રિયો યદુપતિર્યોષાર્ધીકૃતવિગ્રહઃ ॥ ૧૭૦॥

યંબીજજપસન્તુષ્ટો યન્ત્રેશો યન્ત્રસાધનઃ ।
યન્ત્રમધ્યસ્થિતો યન્ત્રી યોગીશ્વરસમાશ્રિતઃ ॥ ૧૭૧॥

॥ ઉત્તરપીઠિકા ॥

એતત્તે કથિતં વિષ્ણો રુદ્રનામસહસ્રકમ્ ।
શ્રવણાત્પઠનાચ્ચૈવ મનનાચ્ચ ફલપ્રદમ્ ॥ ૧॥

ધર્માર્થિકામમોક્ષાખ્ય ચતુર્વર્ગફલપ્રદમ્ ।
વિદ્યાકામી સુવિદ્યાં ચ લભતે નાત્ર સંશયઃ ॥ ૨॥

પુત્રાર્થી લભતે પુત્રં કન્યાર્થી ફલમશ્નુતે ।
વિજયાર્થી વિજયં ચૈક ગૃહાર્થી ગૃહમાપ્નુયાત્ ॥ ૩॥

પુષ્ટિં બલં યશો વર્ચો દીર્ઘમાયુશ્ચ વિન્દતે ।
સર્વજ્વરવિનાશાય એતન્નામસહસ્રકમ્ ॥ ૪॥

પઠિત્વા પાઠયિત્વા વા મુચ્યતે જ્વરપીડનાત્ ।
પરમન્ત્રકૃતાદ્દોષાત્ રક્ષતીદં ન સંશયઃ ॥ ૫॥

સર્વગ્રન્થિવિનાશાય પઠેન્નામસહસ્રકમ્ ।
સર્વગ્રહવિનાશાર્થં જપેદેતત્સહસ્રકમ્ ॥ ૬॥

અપમૃત્યુભયં નાસ્તિ અનેકવિષનાશનમ્ ।
નહિ ચોરભયં તસ્ય નામસાહસ્રપાઠિનઃ ॥ ૭॥

સર્વપુષ્પૈસ્સમભ્યર્ચ્ય સર્વસિદ્ધિમવાપ્નુયાત્ ।
ત્રિદલૈઃ બિલ્વપત્રૈશ્ચ અચ્છિદ્રૈઃ કોમલૈઃ નવૈઃ ॥ ૮॥

રુદ્રાર્પણં યઃ કરોતિ સર્વદોષાત્પ્રમુચ્યતે ।
અષ્ટમ્યાં પૂર્ણિમાયાં ચ અમાયાં ચ વિશેષતઃ ॥ ૯॥

આર્દ્રાયાં ચ પ્રદોષે ચ સોમવારે ગુરોર્દિને ।
યઃ પઠિત્વા ચાર્ચનાં ચ કુરુતે સ ચ માનવઃ ॥ ૧૦॥

સ સર્વકામાન્લભતે વાગ્યતો નિયમી શુચિઃ ।
સર્વસૌભાગ્યમાપ્નોતિ ક્ષેમારોગ્યં સુખં પરમ્ ॥ ૧૧॥

ચૈત્રે દમનકૈઃ પૂજા વૈશાખે ગન્ધવારિભિઃ ।
જ્યેષ્ઠે તુ ત્રિફલૈઃ પક્વૈઃ આષાઢે ક્ષીરમૂજનમ્ ॥ ૧૨॥

શ્રાવણ્યાં શર્કરાભિઃ સ્યાત્ ગુડાપૂપૈશ્ચ ભદ્રદે ।
અન્નૈરાશ્વયુજે માસિ કાર્તિક્યાં દીપમાલયા ॥ ૧૩॥

માર્ગશીર્ષે ઘૃતૈઃ પૂજા પૌષે ચેક્ષુરસૈરપિ ।
આજ્યર્દ્રકમ્બલૈર્માઘે ફાલ્ગુને દધિભિર્ભવેત્ ॥ ૧૪॥

ઇત્થં દ્વાદશમસેષુ પૂર્ણિમાયાં વિશેષતઃ ।
મહેશ્વરસ્ય પૂજાં યઃ કુરુતે ભક્તિસસંયુતઃ ॥ ૧૫॥

સર્વાન્કામાનવાપ્નોતિ શિવસાયુજ્યમાપ્નુયાત્ ।
મઙ્ગલાનાં મઙ્ગલં ચ એતન્નામસહસ્રકમ્ ॥ ૧૬॥

સુરૂપં ગુણસમ્પન્નં કન્યા ચ લભતે પતિમ્ ।
દીર્ઘસૌમઙ્ગલ્યમાપ્નોતિ મઙ્ગલાનાં પરમ્પરામ્ ॥ ૧૭॥

॥ ઇતિ શ્રીભૃઙ્ગિરિટિસંહિતાયાં શિવવિષ્ણુસંવાદે
શિવોત્કર્ષપ્રકરણે શ્રીરુદ્રસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, DPD

*Shri RudrasahasranAmastotram from Bhringiritisamhita*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*